श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीवैराग्यपञ्चकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवैराग्यपञ्चकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

क्षोणी कोण शतांश पालन कला दुर्वार गर्वानल-
    क्षुभ्यत्क्षुद्र नरेन्द्र चाटु रचना धन्यान् न मन्यामहे।
देवं सेवितुमेव निश्चिनुमहे योऽसौ दयाळुः पुरा
    धाना मुष्टि मुचे कुचेल मुनये दत्ते स्म वित्तेशताम्॥ १ ॥

सिलं किमनलं भवेदनलमौदरं बाधितुं
    पयः प्रसृति पूरकं किमु न धारकं सारसम्।
अयत्न मल मल्लकं पथि पटच्चरं कच्चरं
    भजन्ति विबुधा मुधा ह्यहह कुक्षितः कुक्षितः॥ २ ॥

ज्वलतु जलधि क्रोड क्रीडत्कृपीड भव प्रभा-
    प्रतिभट पटु ज्वाला मालाकुलो जठरानलः।
तृणमपि वयं सायं संफुल्ल मल्लि मतल्लिका
    परिमळमुचा वाचा याचामहे न महीश्वरान्॥ ३ ॥

दुरीश्वर द्वार बहिर्वितर्दिका-
    दुरासिकायै रचितोऽयमञ्जलिः।
यदञ्जनाभं निरपायमस्ति मे
    धनञ्जय स्यन्दन भूषणं धनम्॥ ४ ॥

शरीर पतनावधि प्रभु निषेवणापादनात्
    अबिन्धन धनञ्जय प्रशमदं धनं दन्धनम्।
धनञ्जय विवर्धनं धनमुदूढ गोवर्धनं
    सुसाधनमबाधनं सुमनसां समाराधनम्॥ ५ ॥

नास्ति पित्रार्जितं किञ्चित् न मया किञ्चिदार्जितम्।
अस्ति मे हस्ति शैलाग्रे वस्तु पैतामहं धनम्॥ ६ ॥

॥ इति श्रीवैराग्यपञ्चकं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥